इत्येते देवास्तेषामहं तव। अन्वयं संप्रवक्ष्यामि पक्षशः कुलतो गणान्” इत्युपक्रमे “एते देवगणा राजन्! कीर्त्तितास्तेऽनुपूर्वशः” भा॰आ॰६६अ॰ उक्ताः। देवसंज्ञकोगणः। २नक्षत्रभेदे उपयमशब्दे १२५॰ पृ॰ गणकूटे दृश्यम् ६त॰। ३देवपक्षे ४देवानुचरादौ

**देवगणग्रह** पु॰ सुश्रुतोक्ते देवादिगणरूपे ग्रहे देवानाञ्च शुद्धस्वभावत्वात् ग्रहत्वासम्भवमाशङ्क्य तद्गणानामेव ग्रहत्वं च तत्रोक्तं यथा

“गुह्यानागतविज्ञानमनवस्था सहिष्णुता। क्रिया वाऽमानुषी यस्मिन् स ग्रहः परिकीर्त्यते। अशुचिं भिन्नमर्य्यादं क्षतं वा यदि वाऽक्षतम्। हिंसुर्हिंसाविहारार्थं सत्कारार्थमथापि च। असंख्येया ग्रहगणा ग्रहाधिपतयस्तु ये। व्यज्यन्ते विविधाकारा भिद्यन्ते ते तथाष्टधा। देवास्तथा शत्रुगणाश्च तेषां गन्धर्वयक्षाः पितरो भुजङ्गाः। रक्षांसि या चापि पिशाचजातिरेषोऽष्टधा देवगणग्रहाख्यः। सन्तुष्टः शुचिरपि चेष्टगन्धमाल्यो निस्तन्द्रो ह्यवितथसंस्कृतप्रभाषी। तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति च यः स देवजुष्टः। संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो विमार्गदृष्टिः। सन्तुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति च देवशत्रुजुष्टः। हृष्टात्मा पुलिनवनान्तरोपसेवी स्वाचारः प्रियपरिगीतगन्धमाल्यः। नृत्यन् वा प्रहसति चारु चाल्पशब्दं गन्धर्वग्रहपरिपीडितो मनुष्यः। ताम्राक्षः प्रियतनुरक्तवस्त्रधारी गम्भीरो द्रुतगतिरल्पवाक् सहिष्णुः। तेजस्वी वदति च किं ददामि कस्मै यो यक्षग्रहपरिपीडितो मनुष्यः। प्रेतेभ्यो विसृजति संस्तरेषु पिण्डान् शान्तात्मा जलमपि चापसव्यवस्त्रः। मांसेप्सुस्तिलगुडपायसाभिकामस्तद्भक्तो भवति पितृग्रहाभिभूतः। भूमौ यः प्रसरति सर्पवत्कदाचित् सृक्किण्यौ विलिहति जिह्वया प्रसक्तम्। निद्रालुर्गुडमधुदुग्धपायसेप्सुर्विज्ञेयो भवति भुजङ्गमेन जुष्टः। मांसासृग्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोऽतिशूरः। क्रोधालुर्विपुलबलो निशाविहारी शौचद्विड्भवति च रक्षसा गृहीतः। उद्धस्तः कृशपरुषश्चिरप्रलापी दुर्गन्धो भृशमशुचिस्तथातिलोलः। बह्वाशी विजनहिमाम्बुरात्रिसेवी व्याचेष्टं भ्रमति रुदन् पिशाचजुष्टः। स्थूलाक्षस्त्वरितगतिः स्वफेनलेही निद्रालुः पतति च कम्पते च योऽति। यश्चाद्रिद्विरदनगादिविच्युतःसन् संसृष्टो न भवति वार्द्धकेन जुष्टः। देवग्रहाः पौर्णमास्यामासुराः सन्ध्ययोरपि। गन्धर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रतिपद्यथ। कृष्णपक्षे च पितरः पञ्चम्यामपि चोरगाः। रक्षांसि निशि पैशाचाश्चतुर्दश्यां विशन्ति च। दर्पणादीन् यथा छाया शीतोष्णं प्राणिनो यथा। स्वमणिं भास्करार्चिश्च यथा देहं च देहिनः। विशन्ति च न दृश्यन्ते ग्रहास्तद्वच्छरीरिणम्। तपांसि तीव्राणि तथैव दानव्रतानि धर्मो नियमश्च सत्यम्। गुणास्तथाष्टावपि तेषु नित्या व्यस्ताः समस्ताश्च यथाप्रभावम्। न ते मनुष्यैः सह संविशन्ति नवा मनुष्यान् क्वचिदाविशन्ति। ये वाविशन्तीति वदन्ति मोहात्ते भूतविद्याविषयादपोह्याः। तेषां ग्रहाणां परिचारका ये कोटीसहस्रायुतपद्मसंख्याः। असृग्वसामांसभुजः सुभीमा निशाविहाराश्च तमाविशन्ति। निशाचराणां तेषां हि ये देवगणसंस्थिताः। ते तु तत्सत्वसंसर्गाद्विज्ञेयास्तु तदञ्जनाः। देवग्रहा इति पुनः प्रोच्यन्ते शुचयश्च ये। देववत् ते नमस्यन्ते प्रत्यर्थन्ते च देववत्”।

**देवगणिका** स्त्री ६त॰। स्वर्वेश्यायामप्सरःसु।

**देवगन्धर्व** पु॰ देवानां गन्धर्वः गायनः। १देवसमीपे गायने गन्धर्वभेदे। देवगन्धर्वाश्च मौनेयाः प्राधेयाश्च गन्धर्वशब्दे २५२८ पृ॰ उक्ताः। [राजनि॰।

**देवगन्धा** स्त्री देवप्रियोगन्धोऽस्याः। महामोदयामोषधौ

**देवगर्भ** पु॰देवात् गर्भोयस्य। देवाहितगर्भके देवपुत्रे १नरादौ “प्रतिजग्राह तं राधा विधिवद्दिव्यरूपिणम्। पुत्रं कमलगर्भाभं देवगर्भं श्रियावृतम्” भा॰व॰३०८अ॰। “देवकश्चोग्रसेनश्च देवगर्भसमावुभौ” हरिवं॰ ३८अ॰ “स तस्यां जनयामास देवगर्भोपमं सुतम्” ११८अ॰ २कुशद्वीपस्थ ३नदीभेदे स्त्री “रसकुल्या मधुकुल्या मित्रविन्दा श्रुतविन्दा देवगर्भा घृतच्युता मन्त्रमालेति यासां पयोभिः कुशद्वीपौकसः” भाग॰ ५।२०।११

**देवगान्धार** पु॰ देवप्रियः देवयोग्यो वा गान्धारः। स्वरभेदे “ततस्तु देवगान्धारं छालिक्यं श्रवणामृतम्। भौमस्त्रियः प्रजगिरे मनःश्रोत्रसुखावहम्” हरिवं॰ १५२अ॰ २श्रीरागस्य रागिणीभेदे स्त्री “गान्धारी देवगान्धारी मालवी श्रीश्च सारवी। राम(गि)कियपि रागिण्यः श्रीरागस्य प्रिया इमाः” सङ्गीत॰दा॰

**देवगायन** पु॰ ६त॰। गन्धर्वे हेमच॰।

**देवगिरि** पु॰ देवानां प्रियः गिरिः। १पर्वतभेदे स च